# Animadi Stutih

# અનિમાદિ સ્તુતિઃ

## Document Information

Text title : Animadi Stutih

File name : animAdistutiH.itx

Category : aShTottarashatanAma, devii, stotra, devI

Location : doc_devii

Proofread by : Rajesh Thyagarajan

Description-comments : Kalivilasatantra

Latest update : March 23, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 23, 2024

*sanskritdocuments.org*

# અનિમાદિ સ્તુતિઃ

(અથ શ્રીકાલીવિલાસતન્ત્રે ચતુસ્ત્રિંશત્પટલઃ ।)
શિવ ઉવાચ ।
અકારાદિક્ષકારાન્તં ચન્દ્રબિન્દુસમન્વિતમ્ ।
પ્રજપેદનુલોમેન વિલોમેન મનું તતઃ ॥ ૧॥

ઇષ્ટમન્ત્રં તતો જપ્ત્વા અક્ષરાદીન્ જપેત્તતઃ ।
તદા પૂતો ભવેન્મન્ત્રઃ શાપાદિદોષસંયુતઃ ॥ ૨॥

અણિ મે કામિનિ માતઃ નમસ્તુભ્યં નમોનમઃ ।
કોમુદિત્વણિમે નિત્યં જ્યોત્સ્ના રૂપિણિ તે નમઃ ॥ ૩॥

શશિવક્ત્રે નમસ્તુભ્યં સુલોચનિ નમોનમઃ ।
વિરૂપાક્ષિ નમસ્તુભ્યં વિશાલાક્ષિ નમોનમઃ ॥ ૪॥

અણિ મે વૈષ્ણવિતુભ્યં મોનાક્ષિ ચાણિ મે નમઃ ।
નમસ્તે નર્ત્તકિ દેવિ ! વિત્યરૂપે નમોનમઃ ॥ ૫॥

અનિમે નિર્મલેતુભ્યં સિઞ્જિનિતે નમોનમઃ ।
જ્યોતિર્મયિ નમસ્તુભ્યં ઘોરરૂપિણિ તે નમઃ ॥ ૬॥

સદ્યોજાતમુખાદેષસ્તવરાજો વિનિર્ગતઃ ।
શ્રીવામદેવ ઉવાચ ।
ચન્દ્રિકે લધિમે તુભ્યં નમસ્તુભ્યં નમોનમઃ ॥ ૭॥

શઙ્ખહસ્તેનમસ્તુભ્યં ચન્દ્રાસ્યેતે નમોનમઃ ।
હરિણાક્ષિ નમસ્તુભ્યં નમસ્તુભ્યં નમોનમઃ ॥ ૮॥

સુલોચને નમસ્તુભ્યં શઙ્ખિનિતે નમોનમઃ ।
શઙ્ખહસ્તે પ્રાપ્તિસિદ્ધે ચક્રહસ્તે નમોનમઃ ॥ ૯॥

હે ચક્રિણિ નમસ્તુભ્યં વિદ્યારૂપિણિ તે નમઃ ।

વિદ્યોપ પ્રાપ્તિસિદ્ધ્યર્થં નમસ્તુભ્યં નમોનમઃ ॥ ૧૦॥

વામદેવ મુખાદેષસ્તવરાજો વિનિર્ગતઃ ।
શ્રીઅઘોર ઉવાચ ।
બાણિ તેન નમસ્તુભત્ર કામ્યસિદ્ધિસ્વરૂપિણિ ॥ ૧૧॥

પ્રકામ્ય વિમલે તુભ્યં પિશાલાક્ષે નમોનમઃ ।
હે વિશાલે નમસ્તુભ્યં વિષમે ચ નમોનમઃ ॥ ૧૨॥

અઘોરમુખસમ્મુક્તઃ સ્તવરાજઃ પ્રકીર્ત્તિતઃ ।
શ્રીઈશાન ઉવાચ ।
નમસ્તે મહિમે શોભે સ્વરૂપે તે નમોનમઃ ॥ ૧૩॥

સુન્દરિ મહિમે તુભ્યં ગન્ધવાહે નમોનમઃ ।
ગન્ધિનિ મર્હિમે તુભત્ર નમસ્તુભત્ર નમોનમઃ ॥ ૧૪॥

ગગણેચ નમસ્તુભત્ર ગાનરૂપિનિતે નમઃ ॥ ૧૫॥

રુદ્રરૂપિ નમસ્તુભ્યં ઈશ્વરિ ત્વાં નમામ્યહમ્ ।
શ્રીતામસ ઉવાચ ।
પિનાકિનિ નમસ્તુભ્યં વશિત્વા સિદ્ધિરૂપિણિ ॥ ૧૬॥

શઙ્કરરૂપિણિ તુભ્યં હરરૂપિણિ તે નમઃ ।
કલ્યાણિ હે નમસ્તુભ્યં હરરૂપિણિ તે નમઃ ॥ ૧૭॥

મઙ્ગલે હે નમસ્તુભ્યં નમસ્તે સિદ્ધિરૂપિણિ ।
નમસ્તે મઙ્ગલે નિત્યે કોણવિંશતિસંયુતે ॥ ૧૮॥

કામાવસાયિતે કીર્તે નમસ્તુભ્ય નમોનમઃ ।
મનોરૂપિ નમસ્તુભ્યં નમસ્તુભ્યં નમોનમઃ ॥ ૧૮॥

બુધ્દ માતર્નમસ્તુભ્યં વિલક્ષણિ નમોનમઃ ।
નાનારૂપમયિતુભ્યં નમસ્તુભ્યં નમોનમઃ ॥ ૨૦॥

ય ઇદં પઠતિસ્તોત્રં ત્રિસન્ધ્યં શિવસન્નિધૌ ।
સહસા મન્ત્રસિદ્ધિઃ સ્યાત્ લક્ષાવર્ત્તનમાત્રતઃ ॥ ૨૧॥

એતત્ સ્તોત્રં મહેશાનિ કલિકાલે પઠેત્ સુધીઃ ।
એતત્ સ્તોત્રં વિના દેવિ ! અન્યસ્તોત્રં પઠેત્તુયઃ ॥ ૨૨॥

સર્વં તસ્ય ભવેત્ વ્યર્થં ક્ષિપ્તસ્ય વચનં યથા ।

એતત્ સ્તોત્ર પઠિત્વાદૌ તતોઽન્યકવચં પઠેત્ ॥ ૨૩॥

પઠિત્વા સિદ્ધિમાપ્નોતિ ન ચ મે વચનં મૃષા ।
વિનાવોજપરિજ્ઞાન કવચાધ્યયનં વૃથા ॥ ૨૪॥

વર્ણસ્તવમ વિજ્ઞાય સ્તવમન્યં વૃથા ભવેત્ ।
વર્ણતત્ત્વ મવિજ્ઞાય પુરાણં પ્રપઠેત્તુ યઃ ॥ ૨૫॥

સઋણ સર્વ દેવાનાં ભૂત્વા યાતિ પરત્ર ચ ।
ઋણી ભૂત્વા સ પાપિષ્ઠો ભેક યોનિષુ જાયતે ॥ ૨૬॥

બ્રહ્મદિનમભિવ્યાપ્ય ભેકો ભવતિ નિશ્ચિતમ્ ।
દિનાન્તે તુ મહેશાનિ નાના યોની પ્રજાયતે ॥ ૨૭॥

સભ્રષ્ટઃ સ ચ પાપિષ્ઠો ન પુનર્માનુષો ભવેત્ ।
શ્રીગણેશ ઉવાચ ।
પાર્વત્યા નિકટે સ્થિત્વા યત્ શ્રુતં શિવ વક્ત્તૃતઃ ॥ ૨૮॥

તદદ્યકથિતં સર્વં કાલીવિલાસસમ્મતમ્ ।
રહસ્યં સર્વવીજાનાં વર્ણાનાં મુનિપુઙ્ગવ ॥ ૨૮॥

દિવારાત્રપરિજ્ઞાન પ્રથમં પ્રહરં તથા ।
વિના યત્ ક્રિયતે વિપ્ર સર્વં વિધિવિરમ્બનમ્ ॥ ૩૦॥

અષ્ટાઙ્ગ યોગવિજ્ઞાનં ભક્ત્યા તે પરિકીર્ત્તિતમ્ ।
ન યોગેન વિના મન્ત્રો મન્ત્રેણ વિફલો હિ સઃ ॥ ૩૧॥

દ્વયોરભ્યાસમાત્રેણ મન્ત્રસિદ્ધિઃ પ્રજાયતે ।
વિનાત્વેકતરાભ્યાસં મન્ત્રસિદ્ધિર્નજાયતે ॥ ૩૨॥

ઇતિ અનિમાદિ સ્તુતિઃ સમાપ્તા ।

ઇતિ શ્રીકાલોવિલામતન્ત્રે ચતુસ્વિંશત્તમઃ પટલઃ સમાપ્તઃ ।

Proofread by Rajesh Thyagarajan

*Animadi Stutih*

pdf was typeset on March 23, 2024

Please send corrections to *sanskrit@cheerful.com*